श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री भरद्वाजमुनिभिरनुगृहीतम्

# ॥ श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रम् ॥

उद्गीताढ्यं महाभीमं त्रिनेत्रञ्चोग्र विग्रहम्।
उज्ज्वलं तं श्रियाजुष्टं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 1 ॥

ग्रन्थान्त वेद्यं देवेशं गगनाश्रय विग्रहम्।
गर्जनात्रस्त विश्वाण्डं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 2 ॥

वीथिहोत्रेक्षणं वीरं विपक्षक्षयदीक्षितम्।
विश्वंबरं विरूपाक्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 3 ॥

रङ्गनाथं दयानाथं दीनबन्धुं जगद्गुरुम्।
रणकोलाहलं धीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 4 ॥

मन्त्रराजासनारूढं मार्ताण्डोज्ज्वल तेजसम्।
मणिरत्न किरीटाढ्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 5 ॥

हाहाहूह्वादि गन्धर्वैः स्तूयमान पदांबुजम्।
उग्ररूपधरं देवं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 6 ॥

विधि वेद प्रदं वीरं विघ्ननाशं रमापतिम्।
वज्रखङ्गधरं धीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 7 ॥

विष्णु शब्ध दलस्तम्भं दुष्टराक्षस नाशनम्।
दुर्निरीक्षं दुराधर्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 8 ॥

ज्वलत्पावकसङ्काशं ज्वालामाला मुखांबुजम्।
दारिद्र्य नाशनं श्री तं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 9 ॥

लं बीजं देवतानाथं दीर्घवृत्त महाभुजम्।
लक्ष्म्यालिङ्गित वक्षस्कं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **10**॥

तन्त्रीभूज जगत्कृत्स्नं धर्मवैकुण्ठ नायकम्।
मन्त्रजापक सान्निध्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **11**॥

सर्वाण्ड कोश मालाढ्यं सर्वाण्डान्तर वासिनम्।
अष्टास्यकण्ठ भेरण्डं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **12**॥

तोमराङ्कुश वज्राणां सम दंष्ट्रैर्मुखैःस्थितम्।
शत्रुक्षयकरं व्याघ्रं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **13**॥

मुनिमानस सञ्चारं भुक्ति मुक्ति फलप्रदम्।
हयास्यं ज्ञानदातारं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **14**॥

कं शब्द कङ्कणोपेतं कमलायत लोचनम्।
सर्वैश्वर्यप्रदं क्रोडं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **15**॥

नृलोक रक्षणपरं भूतोच्चाटन तत्परम्।
आञ्जनेयमुखं वीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **16**॥

सितवर्णं दीर्घनासं नागाभरण भूषितम्।
गरुडास्यं महाधीरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **17**॥

म्हं म्हं म्हं शब्दसहितं मानवाराधनोत्सुकम्।
भल्लूक वक्त्रं भीतिघ्नं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **18**॥

भीमाक्ष नासिकोपेतं वेदग्रहण तत्परम्।
धरणीधृत मुत्सङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **19**॥

षड्वक्त्र पूजिताङ्घ्र्यब्जं धृष्टकोद्धृत मण्डलम्।
कोमलाङ्गं महासत्वं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **20**॥

णंकार किङ्किणी जालं ज्ञानमूर्तिं धरापतिम्।
वराहाङ्गं मुदाराङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **21**॥

भयघ्नं सर्वभूतानां प्रह्लादाभीष्ट दायिनम्।
नृसिंहस्तम्भ संबोध्यं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **22**॥

द्रव्य याञ्चापरं विप्रं बलिमानमुषं हरिम्।
वामनं रूपमास्थाय श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **23**॥

मृत्युरूपं क्षत्रियाणां मुग्धस्निग्धमुखांबुजम्।
जामदग्न्यं परं देवं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **24**॥

घ्रुं शब्दयुक्त कोदण्डं दुष्टरावण मर्दनम्।
रामं कमलपत्राक्षं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **25**॥

मृदङ्गगीतप्रणवश्रवणासक्तमानसम्।
बलरामं हलधरं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **26**॥

घ्रुं घ्रुं घ्रुं घ्रुं वेणु नादं ब्रह्मरुद्रादि सेवितम्।
यशोदा तनयं कृष्णं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **27**॥

नलिनाक्षं अग्निरूपं म्लेच्छनाशन तत्परम्।
ज्वालामालापूरिताङ्गं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **28**॥

मानायकं महासत्वं ममाभीष्ट प्रदायकम्।
मद्रक्षणपरं शान्तं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **29**॥

मृत्युटङ्कार संयुक्तं शार्ङ्गधन्वान मीश्वरम्।
सद्वस्त्राभरणोपेतं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **30**॥

यन्नामस्मरणात्सर्व भूतवेताल राक्षसाः।
शत्रवः प्रलयं यान्ति श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ **31**॥

हं बीजनादं सर्वेशं शरणं वरयाम्यहम्।
उपायभूतं लक्ष्मीशं श्रीं क्ष्रौं ह्रीं नृहरिं भजे॥ 32॥

**फलश्रुतिः**

भरद्वाजकृतं स्तोत्रं मन्त्रजार्णव संभवम्।
सकृत्पठनमात्रेण सर्वदुःखविनाशनम्॥ 1॥

राजवश्यं जगद्वश्यं सर्ववश्यं भवेद्ध्रुवम्।
भूतप्रेत पिशाचादि व्याधि दुर्भिक्षतस्कराः॥ 2॥

दूरादेव प्रणश्यन्ति सत्यं सत्यं न संशयः।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्॥ 3॥

सर्वार्थी सर्वमाप्नोति मोक्षार्थी मोक्षमाप्नुयात्।
यं यं कामयते चित्तं तं तं प्राप्नोति निश्चयम्॥ 4॥

॥ श्री नृसिंह द्वात्रिंशत् बीजमाला स्तोत्रं समाप्तम्॥